# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : दूराद्धूते च इत्यारभ्य अप्लुतवदुपस्थिते इति यावत्

पाठ्यांशसंख्या : 13

पाठ्यांशस्य मुख्याः अंशाः :

1) दूराद्धूते च।

2) हैहेप्रयोगे हैहयोः।

3) गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्।

4) अप्लुतवदुपस्थिते।

विषयसूची


1.0 : दूराद्धूते च

1.1 : अत्र शेखरस्था विचाराः

2.0 : हैहेप्रयोगे हैहयोः

3.0 : गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्

3.1 : अपिशब्दप्रयोजनम्

3.2 : अनुदात्तं पदमेकवर्जमिति तु त्रिपाद्यां न प्रवर्तते

4.0 : अप्लुतवदुपस्थिते

4.1 : प्रसज्यप्रतिषेधेन व्याख्यानं तु न युक्तम्


ePathshala पाठशाला A Gateway to all Post Graduate Courses

## 1.0 दूराद्धूते च

दूरात् हूते च इति पदच्छेदः। वाक्यस्य टेः प्लुत उदात्तः इत्यधिकृतम्। हूतम् आह्वानम्। तथा च - दूरात् सम्बोधने यद् वाक्यं तस्य टेः प्लुतः स्यात् - इति सूत्रार्थः। उदाहरणम् - सक्तून् पिब देवदत्त३।

### 1.1 अत्र शेखरस्था विचाराः

#### 1.1.1 सूत्रे दूरपदेन किं विवक्षितम्

**शेखरे - यावति देशे प्राकृतप्रयत्नोच्चारितं सम्बोध्यमानो न शृणोति किन्तु अधिकं प्रयत्नमपेक्षते तावद् दूरम् इति।**

**तद्विवरणम्** - ह्वानक्रियापेक्षं दूरत्वमाश्रीयते, न तु श्रोतृपुरुषापेक्षम्। तथाहि यदा श्रोता स्वाभाविकप्रयत्नेन उच्चारितं न शृणोति दूरे विद्यमानत्वात् तदा अधिकप्रयत्नमादाय आह्वानं क्रियते, तदा स शृणोति चेत् स दूरे विद्यत इत्युच्यते। तादृशं दूरत्वं सूत्रस्थदूरपदेन ग्राह्यम्।

#### 1.1.2 दूरादाह्वनमित्यनेन किं विवक्षितम्

**शेखरे - दूरादाह्वानञ्च दूराद् बोधनस्योपलक्षणम्, न तु सम्बोधनविभक्तिनियामकस्य 'अभिमुखीकृत्य-बोधन'रूपस्य सम्बोधनस्योपलक्षणम्। आगच्छतु भवान् देवदत्तः - इत्येवमाह्वानस्यापि सम्भवात् इति।**

**तद्विवरणम्** - दूरादाह्वानमिति सम्बोधनमात्रोपलक्षणमिति तत्वबोधिनीकारादयः। तन्न समीचीनम्। तथासति आगच्छतु भवान् देवदत्तः इत्यादिस्थले प्लुतो न सिध्येत्। तथाहि - सम्बोधनं नाम अभिमुखीकृत्य बोधनम्। अभिमुखीकरणञ्च सम्बोधन-प्रथमान्तपदेन भवति। तथा च यत्र सम्बोधनप्रथमान्तप्रयोगपूर्वकं दूरादाह्वानं तत्रैव सूत्रमिदं प्रवर्तते। आगच्छतु भवान् देवदत्तः - इत्यादिस्थले सम्बोधनप्रथमान्त-

पदप्रयोगाभावात् प्लुतो न सिध्येत्। तस्मात् दूरादाह्वानमित्यनेन (दूराद् बोधनम्) इत्येवार्थो ग्राह्यः। अत्र भाष्यमपि प्रमाणम्। तथाहि - आकडारादेका संज्ञा इति सूत्रे नदीगुरुसंज्ञयोः समावेशे वात्सीबन्धुरित्यत्र गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् इत्यनेन विहितः प्लुतः सिध्यतीति फलमुक्तम्। वात्सीबन्धुरित्यस्य सम्बोधनप्रथमान्तत्वाभावात् कथं तदुदाहरणत्वं स्यात्। तस्मात् दूराद् ज्ञापनमात्रं दूरादाह्वानमिति स्वीकरणीयम्।

**शेखरे - उपलक्षणत्वात् असत्यपि आह्वाने भवति। तदाह- सक्तूनित्यादि इति।**

**तद्विवरणम्** - दूरादाह्वानमित्यत्र यदि यथाश्रुतार्थः स्वीक्रियेत तर्हि आगच्छ देवदत्त इत्येवं यत्र आह्वानमस्ति तत्रैव प्लुतः स्यात्। तस्मात् - दूरादाह्वानमिति दूराद् बोधनस्योपलक्षणमिति स्वीकृतम्। तथा च आह्वानाभावेऽपि प्लुतः सिध्यति। यथा - सक्तून् पिब देवदत्त३ इत्युदाहरणे आह्वानं नास्ति, तथापि प्लुतलाभः।

**शेखरे - अत्रापि दूराद्धूते इत्येतद्, अनुवृत्तस्य पदस्येत्यस्य विशेषणम्, तेन हूयमानार्थवाचिनः पदस्यैव टेः प्लुतः। तच्च रूढं यौगिकं वेत्यन्यदेतत् इति।**

**तद्विवरणम्** – प्रत्यभिवादेऽशूद्रे इत्यत्र अधिकृते पदस्येत्यत्र प्रत्यभिवादे इत्यस्य विशेषणतयान्वयस्वीकारात्, प्रत्यभ्युद्यमानार्थवाचिनः पदस्यैव तेन सूत्रेण प्लुतः तथा अत्रापि दूराद्धूते इत्येतत् पदस्येत्यत्र विशेषणमिति स्वीक्रियते। तथा च दूराद्धूते यत् पदं तदन्तस्य वाक्यस्य टेः प्लुत इति निष्कृष्टः सूत्रार्थः। तथा च हूयमानार्थवाचिनः पदस्यैव प्लुतोऽनेन विधीयते। सक्तून् पिब देवदत्त३ इत्यत्र हूयमानः अर्थः देवदत्तः, तद्वाची देवदत्तशब्दः, तदन्तं वाक्यं सक्तूनित्यादि। हूयमानार्थवाचि पदं रूढं यौगिकं वा। सक्तून् पिब गोपाल३ इत्यादिस्थले गोपाल इति यौगिकम्।

e-पाठशाला A Gateway to all Post Graduate Courses

## 2.0 हैहेप्रयोगे हैहयोः

(दूराद्धूते, वाक्यस्य, प्लुतः) इति पदान्यनुवर्तन्ते। नियमार्थत्वमङ्गीकृत्य वृत्तिकारादिरीत्या इदं सूत्रम् -एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्। हे३ राम, राम है३ - इति कौमुद्यामुपन्यस्तम्।

है हे इति सम्बोधनद्योतकौ शब्दौ। लोके केवलाभ्यामपि है हे शब्दाभ्यां सम्बोधनं दृश्यते। तस्मात् हूयमानार्थवाचकत्वं हूयमानार्थद्योतकत्वं वा तयोरस्ति। तथा च आगच्छ देवदत्त हे इत्येवं वाक्यान्ते प्रयुज्यमानयोः तयोः दूराद्धूते च इत्येनन प्लुतः सिध्यत्येव, अनन्त्ययोरपि गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् इति सूत्रेण सिध्यति। ततश्च प्लुतविध्यर्थमिदं नावश्यकम्। किन्तु नियमार्थमिदम्। तथाहि- हैहेपदवति वाक्ये हैहयोरेव प्लुत इति। प्रयोगग्रहणाभावे वाक्यान्तहैहेप्लुत एव तद्वाक्यप्राप्तप्लुतान्तरं निवर्तयेत्। प्रयोगग्रहणे तु अन्त्यो वा अनन्त्यो वा यस्मिन् वाक्ये हैशब्दो हेशब्दो वास्ति तत्र तयोरेव प्लुतो नान्यस्य इति नियमः सिध्यति।

A Gateway to all Post Graduate Courses

## 2.1 विधिसूत्रत्वम्

**शेखरे तु** - विधिसूत्रत्वमस्य प्रतिपादितं - केचित्तु...इत्याहुरिति।

**तद्विवरणम्** - है हे इत्यनयोः हूयमानार्थवृत्तित्वं नास्ति। तथाच दूराद्धूते च इत्यनेन वा गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् इत्यनेन वा तयोः प्लुतो न सिध्यतीति कृत्वा विध्यर्थमेवेदं वचनम्। तत्र हैहयोः इत्यंशेन लभ्यः प्लुतः वाक्यान्त्यत्वे सत्येव भवति, वाक्यस्य टेः प्लुत इत्यधिकारात्। आगच्छ हे३ इत्युदाहरणम्। द्वितीयेन हैहे इत्यंशेन अनन्त्ययोः प्लुतो लभ्यते। हे३ राम इत्युदाहरणम्। प्रयोगग्रहणेन यत्र सम्बोधनप्रथमान्तप्रयोगानन्तरं तयोः प्रयोगः राम हे इत्येवं तत्र

सम्बोधनान्तप्रयोगेणैव आभिमुख्यस्य द्योतितत्वाद् द्योत्याभावाद् अनर्थकयोः तयोः प्लुतसिध्यर्थम्। एवञ्च हैहयोरेवेति नियमाभावात् हैहेप्रयोगवति वाक्ये तयोरपि भवति अन्यस्यापि यथायोगं प्लुतः भवेदेव।

**शेखरे - यत्तु अयं हूयमानार्थपदस्य टेः प्लुतस्य बाधकः तक्रकौण्डिन्यन्यायादिति तन्न, शिव हे इत्यादौ तस्याप्राप्तेः तन्न्यायविषयाभावात् इति।**

**तद्विवरणम्** - दूराद्धूते च इत्यनेन वाक्यान्तस्य हूयमानार्थपदस्य टेः प्लुत उच्यते। अनेन तु तस्यैव वाक्यस्य हैहेशब्दवत्त्वे सति विधीयमानः प्लुतः तं प्लुतं बाधते। यथा (ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय) इत्युक्ते कौण्डिन्याय दधिदानस्य सम्भवेऽपि दधि न दीयते किन्तु तक्रमेव दीयते एवं (दूराद्धूतवाक्यानां टिः प्लवताम्, हैहेप्रयोगवतो वाक्यस्य हैहेशब्दः प्लवताम्) इत्युक्ते हैहेप्रयोगवति वाक्ये टेः प्लवनस्य सम्भवेऽपि न प्लवते, किन्तु हैहेशब्द एव प्लवते - इति हरदत्तस्य आशयः। तदयुक्तमिति नागेशः। तथाहि - तक्रदानस्य दधिदानबाधकत्वं प्रति तदप्राप्तियोग्ये अचारितार्थ्यं बीजम्। प्रकृते - दूराद्धूते चेति सूत्रस्य अप्रवृत्तिस्थले यदि हैहेसूत्रस्यापि अप्रवृत्तिः स्यात् तर्हि हैहेसूत्रस्य दूराद्धूतसूत्रबाधकत्वं वक्तुं शक्यते। परन्तु राम हे इत्यादौ सम्बोधनप्रथमान्तपदानन्तरप्रयुक्तयोः हैहयोः हूयमानार्थवृत्तित्वाभावात् तादृशस्थले दूराद्धूते चेति सूत्रस्याप्रवृत्तिः। तत्र हैहेसूत्रस्य चारितार्थ्यसम्भवाद् हरदत्तोक्तं बाधकत्वं न युज्यते।

3.0 गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्।

अत्र शेखरे - दूरत्वञ्चात्र अविवक्षितं,तेन प्रत्यभिवादे भोराजन्येत्यस्य विषयेऽपि अस्य प्रवृत्तिः। तद्विषयेऽपि उपलक्ष्यबोधनसम्भवात्। सर्वप्लुतप्रकरणस्य तु न शेषः - इति।

**तद्विवरणम्** - दूराद्धूते च इति सूत्रात् दूराद्धूतपदमनुवर्त्य - (दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्य अनन्त्यस्यापि गुरोर्वा प्लुतः स्याद्) इति सूत्रार्थ उच्यते। हूतशब्दस्य आह्वानमित्यर्थः। तच्च साक्षाद्बोधनस्योपलक्षणम्। दूरादित्यस्य अनुवृत्तिः वस्तुतः नास्ति। अनुवर्तनेऽपि तदर्थविवक्षा नास्ति। तथाहि – प्रत्यभिवादेऽशूद्रे, भोराजन्यविशां वेति वाच्यम्, दूराद्धूते च - इति त्रिभिर्वचनैः वाक्यस्य टेः प्लुतो विहितः। स एव अनन्त्यस्यापि अनेन सूत्रेण विधीयते। यदि दूरादित्यस्य विवक्षा स्वीक्रियते तर्हि प्रत्यभिवादेऽशूद्रे भोराजन्यविशां वेति वाच्यम् इति सूत्रद्वयविषये दूरादाह्वानाभावात् तद्विषये सूत्रमिदं न प्रवर्तेत।

यदि प्लुतप्रकरणे पठितानां सर्वेषामपि प्लुतविधायकसूत्राणां विषये सूत्रस्यास्य प्रवृत्तिरिष्टा स्यात् तर्हि वाक्यस्य टेः प्लुत उदात्त इत्यनेन सहैव अधिकारसूत्रतया सूत्रमिदं पठितं स्यात्। तथा अकरणात्तु प्रत्यभिवादेऽशूद्रे, भोराजन्यविशां वेति वाच्यम्, दूराद्धूते च -इति वचनत्रयस्यैव शेषभूतमिदं सूत्रं, न त्वन्येषाम्।

### 3.1 अपिशब्दप्रयोजनम्

**शेखरे - अपिशब्दो यथाप्राप्तटिसमुच्चयार्थः। यदि तु गुरोः सन्निधानादन्त्यो गुरुरेव समुच्चीयेत तदा अन्त्यलघुमति अनन्त्यगुरौ एतस्य अन्त्यलघौ दूराद्धूते च इत्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः। एकैकग्रहणं तु एतद्विहितानामेव पर्यायार्थं स्यात्। तेन यत्रान्त्योऽपि गुरुः, अनन्त्यगुरुद्वयं वा तत्रैव पर्यायः स्यात् - इति।**

**तद्विवरणम्** - सूत्रस्थेन अपिशब्देन किं समुच्चीयते इति प्रश्नः। अपिशब्देन यथाप्राप्तटिरेव समुच्चीयत इति स्वीकर्तव्यम्। अनन्त्यस्य अन्त्यस्यापि ऋकारभिन्नस्य एकैकस्य गुरोः प्लुतः - इति नार्थः। किन्तु - अनन्त्यस्य ऋकारभिन्नस्य एकैकस्य गुरोः प्लुतः, वाक्यस्य टेरपि प्लुतः - इत्यर्थः। अन्यथा यस्मिन् वाक्ये अन्त्यो वर्णो लघुरस्ति, अनन्त्याश्च सन्ति गुरवः, तस्मिन् वाक्ये

अन्त्यलघुवर्णे दूराद्धूते च इति सूत्रविहितः प्लुतः प्राप्नोति, तत्समकालमेव अनन्त्यगुरुषु गुरोरनृत इति सूत्रविहितः प्लुत इति एकस्मिन्नेव वाक्ये प्लुतद्वयप्रसङ्गः। एकस्यैव तु प्लुत इष्यते।

ननु एकैकग्रहणेन प्लुतद्वयप्राप्तिः वारयितुं शक्यते खलु इति चेत्। तथा न शक्यते। यस्मिन् वाक्ये अनन्त्यश्च अन्त्यश्च गुरुरस्ति, अथवा यस्मिन् वाक्ये अनन्त्या बह्वो गुरवः स्युः तादृशस्थले एकैकस्यैव गुरोः प्लुत इति कथनेन अनेकस्य गुरोः युगपत्प्लुतप्राप्तिः वारयितुं शक्यते। एवञ्च तादृशस्थले चरितार्थम् एकैकग्रहणं वाक्यान्त्यलघौ दूराद्धूते चेत्येतत्सूत्रविहितप्लुतस्य पर्यायार्थं न उपयुज्यते।

### 3.2 अनुदात्तं पदमेकवर्जमिति तु त्रिपाद्यां न प्रवर्तते

वाक्यस्य टेः प्लुत उदात्तः इत्यधिकृत्य प्लुतो विधीयते। यस्मिन् वाक्ये यस्य वर्णस्य स्थाने प्लुत उदात्तो विधीयते तस्मिन् अन्येषां सर्वेषां वर्णानाम् अनुदात्तं पदमेकवर्जमिति परिभाषया अनुदात्तस्वरो भविष्यति। प्लुतोदात्तयोः सन्नियोगशिष्टत्वाच्च उदात्तविरहेण प्लुतो न भविष्यति। तथाच तया परिभाषयैव प्रकृते अनेकप्लुतवारणं सम्भवतीति एकैकग्रहणं व्यर्थम्। -इति पूर्वपक्षः। स्वरितत्वप्रतिज्ञानात् तस्याः परिभाषायाः त्रिपाद्यामप्रवृत्तिरिति स्वरितो वानुदात्ते पदादाविति सूत्रे भाष्ये सिद्धान्तिततत्वात् प्रकृतसूत्रे एकैकग्रहणाभावे अनेकप्लुतप्रसङ्गः स्यात्। तस्मादेकैकग्रहणमावश्यकम्।

**शेखरे - प्राचामिति तु पक्षे सर्वेषां प्लुताभावार्थम् - इति।**

**तद्विवरणम्** - सूत्रे प्राचामिति पदं विद्यते। तेनैव अनेकप्लुतवारणं सम्भवति, तथा च एकैकग्रहणं व्यर्थम् - इत्याक्षेपः। प्राचामिति ग्रहणस्य विकल्पः फलम्।

यद्येकैकग्रहणम् अकृत्वा (अनन्त्यस्य गुरोः प्लुतः प्राचाम्) इत्येवोच्येत तदा तदभावे (वाक्यस्य टेः प्लुतः) इति वचनेन विहितः प्लुतः स्यात्। तथा च (वाक्यस्य टेः प्लुतः)/(अनन्त्यस्य गुरोः प्लुतः) इति वचनयोरेव पर्यायेण प्रवृत्तिः स्यात्। (अनन्त्यस्य गुरोः प्लुतः) इत्यनेनोच्यमानः प्लुतः युगपद् अनन्त्येषु बहुषु प्राप्नुयात्। एकैकग्रहणे कृते तु तेनैव विकल्पे सिद्धे अनेकप्लुतवारणे च सिद्धे प्राचांग्रहणस्य प्रयोजनान्तरं व्याख्यायते। तथाहि - प्राचामिति पृथक् सूत्रम्। ततश्च (सर्वः प्लुतो विकल्पेन भवति) - इत्यर्थः फलति। सा च व्यवस्थितविभाषा। तथाहि- अग्नीत्प्रेषणे परस्य च इत्यनेन विहितः प्लुतः (ओ३श्रा३वय), (आ३श्रा३वय) इति शब्दद्वयं यज्ञकर्मणि प्लुतविशिष्टमेव उच्चारणीयम्। उद्धर आहर इत्यादौ उद्धर३/ उद्धर, आहर३/आहर इति विकल्पेन प्लावयितुं शक्यते। अग्नीदग्नीन् विहर इत्यत्र तु प्लुतो न कर्तव्य एव। अग्नीत्प्रेषणविषये यदिदं वैविध्यं तत् व्यवस्थितविभाषाश्रयणेन भाष्ये समर्थितम्।

### 4.0 अप्लुतवदुपस्थिते

वेदस्य पदपाठे प्रक्षिप्यमाणः इतिशब्दः उपस्थित इत्युच्यते। उपस्थिते परे प्लुतः अप्लुतवद् भवति - इति सूत्रार्थः। प्लुते अप्लुतसादृश्यम् अतिदिश्यते। अप्लुतस्य दीर्घस्य यथा प्रकृतिभावो नास्ति तथा अस्य प्लुतस्यापि प्रकृतिभावो नास्तीति यावत्। यथा - (सुश्लोक३) इति वेदस्थं प्लुतविशिष्टं पदम्। पदपाठे उपस्थितपरकत्वे, (सुश्लोक३ + इति = सुश्लोकेति)। प्रकृतिभावाभावे एकादेशः।

**सूत्रे वत्करणस्य किं प्रयोजनमिति विचार्यते -**

अप्लुत उपस्थिते इति चेत् सूत्रं तर्हि पर्युदासमाश्रित्य (उपस्थिते परे प्लुतस्य स्थाने प्लुतभिन्नः प्लुतसदृशः स्याद्) इति सूत्रार्थः। प्लुतभिन्नः प्लुतसदृशो दीर्घ एव। अप्लुते विधीयमाने कारणस्य प्लुतस्य निवृत्तिः। कारणनिवृत्तौ प्रकृतिभावरूपं

कार्यमपि न भविष्यति। अप्लुतवद्भावे विधीयमाने तु कार्यमेव निवर्तते, कारणं तिष्ठति। यद्यपि - सुश्लोक३ + इति = सुश्लोक + इति = सुश्लोकेति इत्यादौ प्लुतकार्यस्य प्रकृतिभावस्य निषेधे वा, कारणस्य प्लुतस्यैव निषेधे वा नास्ति फले भेदः तथापि प्रगृह्यस्थले फलभेदोऽस्ति। तथाहि- प्रगृह्यसंज्ञकानाम् अग्नी गुरू इत्यादीनां प्लुते कृते, ततः उपस्थिते च परे, अग्नी३ + इति, गुरू३ + इति इत्येवं स्थिते प्लुतस्य कारणस्य निषेधे कृते प्लुततत्कार्ययोरभावेऽपि प्रगृह्यत्वतत्कार्ये भवतः। ततश्च अग्नी इति गुरू इति इत्येवं रूपापत्तिः। अप्लुतवद्भावे तु प्लुतोऽपि सिध्यति, प्रगृह्याश्रयः प्रकृतिभावोऽपि सिध्यति - अग्नी३ इति, गुरू३ इति -इति। अत्र (अग्नी) इति दीर्घस्य स्थाने (अग्नी३) इत्येवं प्लुते कृतेऽपि तस्यासिद्धत्वात् दीर्घस्यैव प्रगृह्यसंज्ञा। तदनुकरणभूते (अग्नी३) इत्यत्रापि प्रकृतिवदनुकरणम् इति न्यायेन प्रगृह्यसंज्ञा।

**4.1 प्रसज्यप्रतिषेधेन व्याख्यानं तु न युक्तम्**

अप्लुतवदुपस्थिते इत्यत्र यदि पर्युदासः सूत्रकृदभिमतः तर्हि लाघवात् (अप्लुत उपस्थिते) इति वा (दीर्घ उपस्थिते) इत्येव वा सूत्रितं स्यात्। तस्मात् अप्लुतवदिति शब्दे प्रसज्यप्रतिषेधेन - (उपस्थिते परे प्लुतः प्लुतवत् न स्यात्) -इति व्याख्यानमुचितम् - इत्याक्षेपः।

**समाधानम्** - तथा सति ततोऽपि लाघवानुरोधेन अष्टमाध्याये प्लुतप्रकरणे एव (उपस्थिते न) इति सूत्रितं स्यात्। तस्मात् षष्ठाध्याये कृतस्य सूत्रस्य पर्युदासेन व्याख्यानमेव लाघवाद् युक्तम्।

**तत्र कश्चिदाक्षेपः** - यदि पर्युदासः तर्हि - (अग्नी३ + इति) इति स्थिते अप्लुतवद्भाव-प्रगृह्याश्रयप्रकृतिभावयोः युगपत् प्राप्तौ परत्वात् प्रकृतिभावं बाधित्वा अप्लुतवद्भावे

(अग्नी + इति) इति जाते, प्रगृह्याश्रयस्य प्रकृतिभावस्य बाधितत्वादभावात्, सवर्णदीर्घः प्राप्नोति। तस्मात् पर्युदासेऽपि दोष एव - इति।

**समाधानम्** - (अग्नी३ + इति) इति स्थिते इतिशब्दसमभिव्याहारापेक्षत्वाद् बहिरङ्गम् अप्लुतवद्भावं बाधित्वा वर्णमात्रापेक्षत्वेनान्तरङ्गः प्रकृतिभाव एव प्रथमं प्रवर्तते।

**शेखरे - प्लुते कृतेऽपि तस्यासिद्धत्वात् दीर्घत्वबुद्धिवत् तद्गतं प्रगृह्यत्वम् अनुकार्ये सुलभम्। अनुकरणे तु प्रकृतिवदनुकरणम् इत्यतिदेशात् तत्त्वम्।**

**तद्विवरणम्** - वेदस्थो य इतिशब्दः तद्भिन्नः इतिशब्दः उपस्थित इत्युच्यते। अग्निशब्दस्य सम्बोधनप्रथमाद्विवचनान्तम् अग्नीपदम्। तत्र प्लुते कृते (अग्नी३)। ततः इतिशब्दे परे अप्लुतवद्भावेन प्लुताश्रयप्रकृतिभावनिवृत्तावपि प्रगृह्याश्रयप्रकृतिभावो भवत्येव। अस्मिन् उदाहरणे इतिशब्दः अग्नीपदस्य अनुकरणत्वद्योतनार्थो वा भवितुमर्हति पदपाठार्थो वा। यदि पदपाठार्थः तर्हि (अग्नी) इत्यस्य अनुकरणत्वं नास्ति। अनुकरणत्वे तदभावे वा त्रिमात्रिकस्य कथं प्रगृह्यत्वमिति प्रश्नः। अप्लुतवद्भावेन प्लुतकार्यमेव निवर्तते, न प्लुतस्य निवृत्तिः। तथा च ईदूदेद् द्विवचनं प्रगृह्यमिति सूत्रेण दीर्घस्य विहिता प्रगृह्यसंज्ञा कथमत्र भवेत्।

**अत्र समाधानम्** - प्लुतविधायकशास्त्राणि त्रिपादीस्थत्वात् प्रगृह्यसंज्ञाशास्त्रं प्रति असिद्धानि। ततश्च त्रिमात्रत्वे सत्यपि प्रगृह्यसंज्ञां प्रति दीर्घत्वात् प्रगृह्यसंज्ञा सिध्यति, तस्यां सत्यां तन्निबन्धनः प्रकृतिभावश्च सिध्यति। अग्नीपदस्य अनुकरणत्वे तु द्विवचनान्तत्वाभावात् कथं प्रगृह्यसंज्ञा - इति चेत् - प्रकृतिवदनुकरणमिति न्यायेन अनुकरणे प्रकृतिवद्भावः अतिदिश्यते, तथा च अनुकार्यस्य प्रगृह्यसंज्ञा अनुकरणस्यापि सिध्यति।